Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# श्रीभोगीश्वरप्रणीतयोगरत्नप्रदीपिकायां सृष्टितत्त्वानि

मृदुल सोनोवाल
शोधच्छात्रः, Department of Research & Publication, राष्ट्रीयसंस्कृतविश्वविद्यालयः,तिरूपति।

**Article Info**

Volume 7, Issue 1
**Page Number :** 90-94
**Publication Issue :**
January-February-2024

**Article History**
Accepted : 25 Jan 2024
Published : 15 Feb 2024

**शोधसारांशः**– वेदान्तो वेदस्य अन्तिमोभागः अवसानभागः इति विग्रहेण उपनिषद् उच्यते। उपनिषद एव प्राचीनैर्वेदान्तशब्देनोक्ताः। वेदान्तसारे वेदान्तो नाम उपनिषद्प्रमाणमित्युक्तम्। उपनिषदोऽनेकाः, तासु विरोधोऽपि प्रतिभासते। तस्यैव विरोधस्य दूरीकरणाय व्यासेन ब्रह्मसूत्राणि रचितानि। एतानि सूत्राणि पणिनेरपि प्राचीनानि। इमे सर्वेऽपि वेदान्तसिद्धान्ताः। निम्नलिखितविषयेषु मतैक्यं धारयन्ति–

1. अनादिरनुवर्त्तमानोऽयं संसारोऽपास्य एव।
2. ज्ञानपेक्षया कर्मणो गौणत्वम्।
3. ब्रह्मादीन्द्रियातीतवस्तुनिरूपणे वेदाः प्रधानतया प्रमाणानि।
4. उपनिषदो गीता ब्रह्मसूत्राणि चेति प्रस्थानत्रयी मतसाधनायावलम्बनम्।
5. ब्रह्म व्यापक नित्यञ्चेतनञ्च।

परन्तु सृष्टिप्रक्रियाविषये नास्ति कस्यापि विमतिः। अतः शोधलेखत्वेन श्रीभोगीश्वरप्रणीतयोगरत्नप्रदीपिकायां सृष्टितत्त्वानि इति शीर्षकोऽयं स्वीकृतः।

**विशेषशब्दाः**– तमः, आकाशः, सूक्ष्मभूतानि, सूक्ष्मशरीराणि, स्थूलभूतानि, लिङ्गशरीराणि, बुद्धिमनसी, कर्मेन्द्रियपञ्चकं, वायुपञ्चकं, ज्ञानेन्द्रियाणि मनो, चित्तम्, अहङ्कारः, पुरुषः इत्यादयः।

ईश्वरस्य दर्शनवशात् तमोगुणरूपप्रकृतिः आवरणशक्ति विक्षेपशक्ति भेदेनद्विधा विभज्यते। तत्र विक्षेपशक्तितः सूक्ष्मरूपं आकाशः जायते। आकाशात् वायुः, वायोः अग्निः, अग्नेरपः, अद्भ्यः पृथिवी जायते।इमानि पञ्चभूतानिपञ्चतन्त्रमात्रनामधेयानि भवन्ति। एषु ये सत्वरजस्तमसः गुणाः सन्ति ते त्रिगुणात्मकाज्ञानात् आगताः। एतेषाम् आकाशादीनां पृथक पृथक सत्वांशात् श्रोत्रं त्वक् चक्षुः जिह्वा, घ्राणम् इति पञ्चज्ञानेन्द्रियाणि क्रमणे जायन्ते। आकाशादीनां सत्वसमष्ट्या मनोबुद्ध्यहङ्कारचित्तभेदेन चतुर्विधम् अन्तःकरणं जायते। तत्रापि च बुद्धौ अहंकारस्यमनसि चित्तस्य च अन्तर्भावः। एवम् आकाशादीनां रजोगुणात् वाक्पाणिपादपायूपस्थाख्या पञ्चकर्मेन्द्रियानि उत्पद्यन्ते। आकाशादिः रजोगुणसमष्ट्या प्राणापानव्यानोदानसमानाः भेदेन पञ्चविधाः प्राणाः उत्पद्यन्ते। एवं प्रकारेण विक्षेपशक्तेः अज्ञानात् इन्द्रियाणिउत्पद्यन्ते। तदेवाह वेदान्तसारे –**तमःप्रधानविक्षीपशक्तिमदज्ञानोपहितचैतन्यादाकाशआकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीचोत्पद्यते "एतस्मादात्मन आकाशः सम्भूतः (तै उ २११..) इत्यादिश्रुतेः॥तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य।तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेणतेष्वाकाशादिषूत्पद्यन्ते इति।एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते। सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति। ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः।अनयोरेव चित्ताहङ्कारयोरन्तर्भावः। अनुसन्धानात्मिकान्तःकरणवृत्तिः चित्तम। अभिमानात्मिकान्तःकरणवृत्तिः अहङ्कारः।**

**अधुना एतेषं विस्तृतं विवेचनमधः प्रस्तूयते-**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**1 .पुरूष:-** पुरूष: स्वयं निर्गुण:। अत: जले पुष्करपलाशवन्निर्लेप: साक्षीव अवतिष्ठते। पुरूषो हि नियमेन निस्त्रैगुण्यस्वभाववान्। यत: प्रकृतिप्रसूतप्रपञ्चस्य सर्वस्यापि सुखदु:खमोहात्मकत्वेन भोग्यत्वात् जडत्वाच्च तद्विलक्षण: त्रिगुणातीत: पर: चेतन: भोक्ता कश्चिदस्त्येव। स एव पुरूष: आत्मा वेति व्यपदिश्यते। तस्मादुक्तम्-

**तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरूषस्य।**

**कैवल्यं माध्यस्थ्यंद्रष्टृत्वमकर्तृभावश्च।।**[1]इति।।

जडा अपि प्रकृतिभावा: चेतनवदवभासंते। एवं प्रकृतिसान्निध्यवशात् असङ्गोऽपि पुरूष: कर्तेव सुखादिमानिव च अवभासते। प्रकृति-पुरूषसंयोग एष: एव निखिलं संसारचक्रं निर्वाहयति। पुरूषस्य चैतन्यं भोक्तृयोग्यतां। प्रकृतेर्जडत्वं च भोग्ययोग्यता। भोक्तृयोग्यता-भोग्ययोग्यतावसत्वे अनयो: अन्धपङ्गुन्यायेन संयोग: सम्पद्यते। अचेतन प्रकृति:स्ववृत्तिनिर्वाहाय चेतनमधिष्ठातारमुद्वहति। चेतनोऽपि पुरूष: स्वयमप्रसवधर्मी स्वभोग्यप्रसवित्री प्रकृतिधितिष्ठति।

स च पुरूष: न एक: किन्तु अनेक: इति साङ्ख्यानां सिद्धान्त:। प्रतिशरीरं स: भिन्न: एव। अन्यथा कस्मिश्चिदेकस्मिन् म्रियमाणे सर्वे म्रियेरन्, जायमाने च जायेरन्, एकस्मिन् पण्डिते मूर्खो वा सर्वेऽपि पण्डिता: मूर्खा: वा भवेयु:। अत एवोक्तं दृश्यते-

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**

**पुरूषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।**[2]**इति।।**

पुरूषास्तित्वे प्रमाणमुक्तम् विज्ञानभिक्षुण- **परार्थत्वात् पुरूषस्य**[3] इति। अनेकै: विशेषै: संवलितानां पदार्था:। ते च त्रिगुणात्मकस्य परस्यार्थे भवितुं युक्ता:, परस्यापि त्रिगुणात्मकत्वे तदपि परार्थमित्यनवस्था स्यात्। अतस्त्रैगुण्यविपरीत: पुरूषो मन्तव्य:। अपि च यत्सुखदु:खमोहरूपं, यथा रथयन्त्रादि: तत्सर्वं पराधिष्ठितं दृष्टम्। अत: बुद्ध्यादेरपि सुखाद्यात्मकस्यनिस्त्रैगुण्येन अधिष्ठाता भवितुं युक्तम्। सुखदु:खानां सुखदु:खमोहात्मका: भोग्या:। भोग्यानां भोक्तारमन्तरेण न सार्थकत्वम्। सुखदु:खमोहात्मक: कश्चिद् भोक्ता न भवितुमर्हति। स्वात्मनि वृत्तिविरोधात्। तस्मात् निस्त्रैगुण्य: भोक्ता पुरूष: अवश्यमभ्युपेयं भवति। शास्त्राणां च दु:खत्रयप्रशमलक्षणकैवल्यार्थं प्रवृत्तिरपि पुरूषस्तित्वं साध्यति। तदुक्तम्-

**संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**

**पुरूषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।**[4]इति।।

प्रधानं, प्रकृति: अव्यक्तमित्यर्तान्तरम्। तच्च कुतश्चिदप्यनुत्पाद्यमानत्वात् अहेतुमत्। नित्यं, क्रियारहितं, एकं, त्रिगुणात्मकं सर्वमपि परिणामजातं च व्याप्नोति[5] इति। प्रपञ्चेस्मिन् प्रकृते: प्रत्येकंभावा: त्रैगुण्यवन्त: एव अनुभूयन्ते। तस्मात् त्रिगुणात्मकानां सर्वेषां व्यक्तानां कारणं प्रकृति: त्रिगुणात्मिका। सा च प्रकृति: गुणानां साम्यावस्था इति साङ्ख्या:। गुणानां वैषम्ये तु सर्ग:। साम्यावस्थात: गुणानां सदृश: परिणाम:। यत: गुणा: सदा परिणामशीला:। तस्मात् सत्वस्य सत्वपरिणाम: रजसो रज:, तमसश्च तम: परिणाम: यावत्पुरूषसान्निध्यम्। पुरूषसान्निध्ये गुणेषु वैषम्यं भवति। अनेनैव गुणवैषम्येण एकरूपेभ्य: गुणेभ्य: नानारूपमिदं जगदुत्पद्यते।

**एकरूपात् जलात् नारिकेलतालीतिन्दुकामलकादीनां रसोत्पत्तिवत्**।[6] इति।

---

[1].सां.का,-19

[2].सां.का.-18

[3].सां.द.-66

[4]सां.का.-17

[5]सां.का. 10

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।

सांवयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ।।

[6]सां. का.-16

**प्रकृतितत्त्वस्य उपपत्तये शास्त्रे युक्तय:**[7] प्रदर्शिता: सन्ति।

(अ) जगत: सर्वे परिणामा: परिमिता: परन्ताश्च दृश्यन्ते। अत: तेषां मूलकारणं तु अपरिमितं स्वतन्त्रं च भवेत्। (आ) वैश्वरूप्यस्य समस्तभावा: त्रैगुण्यवन्त: एव अनुभूयन्ते। अत: सुखदु:खमोहात्मकस्य विश्वप्रपञ्चस्य तथाविधकारणमेव अवधारणीयं भवति। कार्यगुणा: कारणगुणाश्च भवेयु:। (इ) कार्यं अव्यक्तरूपेण कारणे वर्तते इति सत्कार्यवाद:। अत: समस्तकार्यजातं पूर्वं कारणे अव्यक्तरूपे तिष्ठेत्। तस्मादिदं वैश्वरूपं कारणे अव्यक्तरुपे भवेदिति प्रकृति: अव्यक्तम्। कारणात् कार्यमुत्पद्यते, पुन: कारणे एव प्रलीयते इति नियम:। समस्तमिदं परिणामजातं किञ्चित् कारणात् उत्पन्नम्। एवं यत्र कार्यकारणसन्तते: समाप्तिर्भवेत् तत् सूक्ष्मा मूलप्रकृति। सर्गकाले जगदुत्पद्यते अस्या: प्रकृते:। प्रलयकाले तत्रैव प्रकृतौ सर्वेभावा: लीयन्ते तस्या: लयाभावात् मूलप्रकृति: अलिङ्गम्।

**2.महत्तत्त्वम्-** सर्गादौ प्रकृतौप्रथपरिमणाम: महतत्त्वम्। सुखदु:खमोहात्मकस्य जगत: उत्पत्तये बीजरूपमिदं महतत्त्वम्। समस्तसंसारकार्ये महतत्त्वात् कारणत्वाच्च तत्त्वस्यास्य महत्इत्यन्वर्थसंज्ञा। प्रतिपुरूषसाधारणस्यास्य बुद्धि: इति पर्याय: आभ्यान्तरदृष्ट्या अयं पर्याय:। बुद्दे: असाधारणलक्षणं तु प्रतिविषयाध्यवसायित्वम्[8]। अपि च प्रोक्तम्–

**यदेतद्विस्तृतं बीजं प्रधानपुरूषात्मकम्।**

**महत्तत्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते।।**[9] इति।।

इयं बुद्धि: स्वयमप्रकाशरूपा विषयाणां प्रकाशकरा च।[10] अयमेवास्य असाधारणो धर्म:। बुद्धि: सात्विकरूपां धर्मज्ञानवैराग्यऐश्वर्यधर्मान् अभिव्यञ्जयति। तदेव बुद्धितत्त्वं यदा तमसावृतं भवतितदा अज्ञानाधर्मावैराग्यानैश्वर्याणि उत्पद्यते। प्रकृति: अचेतना जडा च। तस्मात् प्रकृतिकार्यं बुद्धिरपि जडा एव। अथापि गुणविशेषेषु महत्तत्वं समीपतमं पुरूषस्य। अत: पुरूषसान्निध्यवशात् अचेतनाबुद्धि: चेतनावदिव प्रतीयते।[11]'ममेदं कर्तव्यम्''अहं एवं करोमि' इत्यादिनिश्चया: बुद्धिद्वारा एव भवन्तीति सुविदितमेव। एष: अध्यवसाय: निश्चयो वाबुद्धे: कार्यम्। इन्द्रियाणि, अहंकार:, मनश्च सर्वे एते गुणविशेषा: सर्वं प्रकाश्य पुरूषाय बुद्धौ प्रयच्छन्ति[12]। बुद्धिगतं सर्वं विषयं पुरूष: उपलभते। एवं भोग्येन बुद्ध्या सस्मिन्न: पुरूष: भोग्यधर्मभूतं सुखदु:खमोहजातं स्वात्मनि: अभिमन्यमान: अनुभवति। एवं बुद्धि: सर्वमुपभोगं साधयति। अपि च सैव बुद्धि: प्रकृतिपुरूषान्तरं ज्ञानं जनयति[13]। तेन पुरूषस्य स्वयं प्रकृत्या भिन्न: स्वतन्त्र: इति विवेकं साधयति। तत: पुरूषाय स्वस्वरूपानुभवं कारयति।

**3. अहंकार**: - महत्त्वात् अहंकारतत्त्वं जायते। प्रकृते: द्वितीयपरिणामोऽयम्।'अहम्त्व''ममत्व' इत्याद्यभिमानात्मक: भोग एव अहंकार इत्युच्यते[14]। अस्मितारूपा अविद्येयमिति योगनय:।'**अविद्यया अहं कर्ता, भोक्ता, स्वामी च इत्याद्यनुभवा: जायन्ते'।** वस्तुत: इन्द्रियाणि मनश्च स्वं स्वं विषयं अहंकारे अर्पयन्ति। तदुपजीव्य

---

परिणामत: सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ।

[7]सां. का.– 14

अविवेकयादे: सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् ।

कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ।।

[8]सां.द. 2–13,–अध्यावासायो बुद्धि:

[9]सां.प्र.भाष्य.अ. 1–17

[10]यो.सू. 4–19. न तत्स्वाभासं दृश्यत्वात्

[11]सां.का. 20– तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।

[12]सां.का. 36,37 – एते प्रदीपकल्पा: परस्परविलक्षणां गुणविशेषा: कृत्सं पुरूषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ।

[13]सां.का. 37 – सर्वं प्रत्युपभोगं यस्मात् साधयति पुरूषस्य बुद्धि: ।

सैव च विशिनष्टि प्रधानपुरूषान्तरं सूक्ष्मम् ।।

[14].सा.का. 24– अभिमानोऽहंकार: ।

बुद्धिः अध्यवस्यति। अनेन विषयमधिकृत्य अहंकारः पर्यालोचयति।'**अस्मिन् कर्मणि मम अधिकारः, विषयाः मत्कृते एव सन्ति, एषु ममैव अधिकारः, अहमेव शक्तः**'इत्याद्याः भोगाः प्रतीयन्ते। तस्मादेव क्रियायां प्रवृत्तिः। अतः अहंकार एव सुखदुःखमोहात्मके प्रपञ्चे व्यवहारमूलः इति।

गुणवैषम्यात् सात्विकराजसिकतामसिकभेदात् अहंकारः त्रिविधो भवति। तस्मात् द्विविधः सर्गः प्रवर्तते। सात्विकाहंकारः सत्वोद्रेकतया एकादशेन्द्रियाणां जनकः भवति वैकृताहंकारः इति पर्यायः। तमोगुणस्याधिकतया तामसिकाहंकारः पञ्चतन्मात्राणॆ जनकः भवति। भूतादिः इति प्रर्यायेण तामसिकाहंकारः उच्यते। राजसिकाहंकारः अथवा तैजसः उभसर्गाणां प्रवर्तकः[15]। एष सर्गक्रमः ईश्वरकृष्णवाचस्पतिमिश्रयोः सम्मतः। मनः अत्यन्तं सात्विकम्। अतः वैकृताहंकारात् मनः, तैजसाहंकारात् इन्द्रियाणि, भूतादेः पञ्चतन्मात्राणि इति सर्गभेदः प्रदर्शितः[16] इति साङ्ख्यप्रवचनभाष्ये विज्ञानभिक्षुः।

**4.इन्द्रियाणि-** अहंकारात् एकादशेन्द्रियाणि, पञ्चतन्मात्राणि इति द्विविधः सर्गः प्रवर्तते इति पूर्वं प्रोक्तम्। तत्र एकादशेन्द्रियाणि–ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि मनः इति त्रयः गुणविशेषाः। प्रमाकरणानि पञ्चबुद्धीन्द्रियणि। तानि चक्षुःश्रोत्रत्वग्रसनघ्राणाख्यानि। इन्द्रस्य आत्मनः चिह्नत्वात् इन्द्रियमित्युते। एतानि इन्द्रियाणि रूपादि विषयान् गृह्णन्ति। एवं कर्मेन्द्रियाणि पञ्च। वाक्पाणिपादपूयापस्थानि चेति। पञ्चैतानि क्रमात् वचनादानविहरणोत्सर्गानन्दाश्चेति कार्यं जनयति। इन्द्रियाधिष्ठानानि तावत् इन्द्रियाणि भवन्ति[17] इति विज्ञानभिक्षुः स्वभीष्ये।

**5. मनः**- एकादशकमिन्द्रियं मनः इति साङ्ख्याः। ज्ञानेन्द्रियप्रवर्तकत्वात् कर्मेन्द्रियप्रवर्तकत्वा मनः उभयात्मकम्। अपि च सात्विकाहंकारेण जन्यत्वात् इन्द्रियैस्सह समानधार्मं मनः अतः मनः इन्द्रियं च। मनोधिष्ठानवतां चक्षुरादिना वागादीनां त इन्द्रियाणां विषयेषु प्रक्ता सम्भवति। अन्यथा नास्ति।'**सङ्कल्पात्मकं**' मनसः असाधारणं लक्षणम्। प्रथमतः इत्याकारकं निर्विकल्पकं ज्ञानमिन्द्रियैर्भवति। पुनः विशेषणविशेष्यद्वारा '**इदमेव, नैवम्**'इत्याद्यकारेण निर्विकल्पकज्ञानं मनः सम्यक् विवेचयति। इदमेव सङ्कल्पात्मकः मनः। उक्तंच वाचस्पतिमिश्रेण स्वभाष्ये – **अस्ति हि आलोचनं ज्ञानं प्रथमं निर्विकल्पकं बालमूकादिविज्ञानसृशं मुग्धवस्तुजम्। ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया बुद्ध्यावसीयते सापि प्रत्यक्षत्वने सम्मता**[18]इति।

पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि इति दशः इन्द्रियाणि बाह्यकरणानि भवन्ति। बाह्यज्ञानसाधानानि इमानि। बुद्ध्यहंकारमनांसि त्रयं अन्तःकरणमित्युच्यते। आभ्यन्तरज्ञानसाधानानि आहत्य त्रयोदशविधकरणानि विषयैः सम्बध्यन्ते। अत्र निर्विकल्पकं ज्ञानमुत्पद्यते। मनः इन्द्रियैः सह सम्बध्य सङ्कल्पकं ज्ञानं सम्पादयति। इदं ज्ञानं अहंकारद्वारा बुद्धितादात्म्यं गच्छति। बुद्धिः विषयस्य निश्चयं करोति। बुद्धिस्थं निश्चयात्मकं ज्ञानं पुरूषेण गृह्यते। अतः पुरूषेण विषयज्ञानं सम्पद्यते। करणेषु बाह्यकरणानां वर्तमानेन कालेनैव सम्बन्धः। अन्तःकरणं तु कालत्रयेऽपि सम्बद्धं भवति[19]।

**6.पञ्चमहाभूतानि** - पृथिव्यप्तेजोवाव्याकाशा इति पञ्चमहाभूतानि। सूक्ष्यभूतेभ्यः एतेषॆ स्थूलभूतानामुत्पत्तिः अत्र शब्दतन्मात्रेण आकाशभूतस्योत्पत्तिः। स्पर्शत्नमात्रं शब्दतन्मात्रयोगेन वायुभूतं सृजति। अतः शब्दस्पर्शगुमको वायुः। रूपतन्मात्रं शब्दस्पर्शतन्मात्राभ्यां साकं तेजो महाभूतं प्रसूते। अतः तेजसि रूपं, स्पर्शः शब्दः च दृश्यते। रसतन्मात्रेण शब्ज–स्पर्श–रूपतन्मात्राणां सहयोगेन जलभूतमुत्पद्यते। अतः जले मधुरगुणेऽपि शब्द–स्पर्श–रूपाणि दृश्यते। गन्धन्मात्रं शेषैः चर्तुभिः तन्मात्रैः सह पृथिवी तन्मात्रं जनयति। अतः पृथिव्यां प्रधानतया गन्धगुणः भवति। इतरेषां गुणानां भावोऽपि पृथिव्यां दृश्यते[20]। एतानि

---

15.सा.का.– 25

16.सा.प्र.भा. 2–18. सात्विकमेकादशकं प्रवर्तते वैकृताहंकारात् एकादशानां पूरममेकात मनः षोडशात्मगणमध्ये सात्वितम् । अतस्तद्वैकृतात् सात्विकाहंकाराज्जायत इत्यर्थः । अतश्च राजसाहंकाराच्च तन्मात्राणीत्यधिगन्तव्यम् ।

17.सां. प्र. भा. 2–23 अतीन्द्रियमिन्द्रियभ्रांन्तानामधिष्ठानम् ।

18.सा.त.कौ.का. – 27

19.सा.का. – 33

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।

20.सा.त.कौ.का. 22

पञ्चमहाभूतानि विशेषा: इत्युच्यते। ते परस्परं व्यावृत्य अनुभूयन्ते। तन्मात्राणि तु पृथक् रूपेण नानुभूयन्ते इति विशेषाणि। विशेषास्तु पुन: शान्ता: घोरा मूढाश्च भवन्ति।सत्वगुणप्रधान्येन केचित् पदार्था: रजस: प्राधान्येन घोरा: दु:खजनका: अनवस्थिताश्च दृश्यन्ते। ते घोरा: तम: प्राधान्यतया केचित् महाभूता: मूढा: विषण्णा:, गुरवश्च भवन्ति। एते मूढाभूता: उक्तं च कारिकायां –

**तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्य:।**

**एते स्मृता विशेषा शान्ता घोराश्चा मूढाश्च।।**[21] इति।।

**सहायकग्रन्थसूची**


1. उपनिषद्भाष्यम्, (श्रीशङ्करभगवत्पादाचार्यविरचितम्) श्री. एस. सुब्रह्मण्यशास्त्रिण:, महेशअनुसन्धानसंस्थानम्।
2. माण्डूक्योपनिषत् (व्याख्यापञ्चकोपेता), श्री.सि.एन, सीताराम, संस्कृतसंशोधनसंसत्,मेलकोटे, कर्नाटक, 2005।
3. माण्डूक्योपनिषद्भाष्यम् श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं (व्याख्यासप्तकोपेतम्)उपाध्याय कृष्णाचार्य:, श्रीजयतीर्थविद्यापीठम्, बेंगलूरु, 1998।।
4. उपनिषत्सु ज्ञानस्वरूपविवेचनम्, डा.के, अरविन्दराव, राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपति, अन्ध्रप्रदेश:, 2012।
5. वेदान्तवार्तिकम्, आचार्यदिगम्बरमहापात्र:, महर्षिवेदविज्ञानविश्वविद्यालय:,महर्षिनगरम्, गाजियावाद:, उत्तरेप्रदेश:।
6. वेदान्तसार:, (सदानन्दयतिविरचित:), राकेश शास्त्री, परिमल पब्लिकेशन्स, दिल्ली,2003।
7. उपनिषद् (सरल हिन्दी भावार्थ सहित), श्रीराम शर्मा आचार्य:, शान्तिकुञ्ज, हरिद्वार,उत्तरांचल, 2005।
8. ईशादि नौ उपनिषद्, गीता प्रेस, गोरखपुर।
9. ब्रह्मसूत्र शाङ्करभाष्यम्,श्री शङ्करभगवत्पादाचार्या: – राष्ट्रियसंस्कृतसंस्थान दिल्ली2002।
10. भामती–ब्रह्मसूत्रभाष्य व्याख्या, वाचस्पति मिश्र: – राष्ट्रियसंस्कृतसंस्थान दिल्ली 2002
11. वेदान्त परिभाषा, धर्मराजाध्वरीन्द्र:।
12. शिखामणि:–वेदान्तपरिभाषा व्याख्या।
13. बृहदारण्यकोपनिषत् भाष्यवार्तिकम सुरेश्वराचाय: – महेष अनुसन्धानसंस्थानवाराणसी 1982।
14. दशोपनिषव्याख्या, प्रतिपदार्थदीपिका भारद्वाजरामानुजाचार्यविरचिता,विवेककलानिधिप्रेस मद्रास।
15. उपनिषत्षट्कम्, धर्माधिकारीचक्रवर्ती अय्यङ्गार्यसम्पादितम्शंकरभाष्यरङ्गरामानुजभाष्ययुतम्, विद्यारङ्गिणी प्रेस, मैसूरु।
16. ईशाद्यष्टोपनिषद्भाष्यम्, व.न.कृष्णमाचार्य:, रङ्गरामानुजभाष्योपेतम्, लैजिकर्वर्धिनीसभा,
17. दशोपनिषद्भाष्यम्, सुबोधिनी, गोपालनन्दस्वामिविरचितम्, एम्बार कृष्णामाचार्य:, भट्ट जयकृष्णबापूजी, निर्णयसारप्रेसस मुम्बई।
18. दशोपनिषद्भाष्यम् , शांकरभाष्यम् मोतीलाल बनारसीदास, बङ्गलोरोड़ जवाहरनगदिल्ली।
19. माण्डूक्योपन्यासमञ्जरी, श्रीसच्चिदानन्दसरस्वती, अध्यात्मप्रकाशनकार्यालहोठेतरसीपुर।
20. उपनिषत्सारम्, उत्तमूरु वीरराघवाचार्य:, ईशाद्युपनिषदांसाविशिष्टाद्वैतप्रचारिणीसभा, मद्रास।


[21].सां.का. 38